श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६३

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६३

*गोवर्धनोद्धरणवर्णनम्*

ददृशिरे किल तत्क्षणमक्षत-
    स्तनितजृम्भितकम्पितदिक्तटाः।
सुषमया भवदङ्गतुलां गता
    व्रजपदोपरि वारिधरास्त्वया॥ १ ॥

विपुलकरकमिश्रैस्तोयधारानिपातै-
    र्दिशि दिशि पशुपानां मण्डले दण्ड्यमाने।
कुपितहरिकृतान्नः पाहि पाहीति तेषां
    वचनमजित शृण्वन् मा बिभीतेत्यभाणीः॥ २ ॥

कुल इह खलु गोत्रो दैवतं गोत्रशत्रो-
    र्विहतिमिह स रुन्ध्यात् को नु वः संशयोऽस्मिन्।
इति सहसितवादी देव गोवर्द्धनाद्रिं
    त्वरितमुदमुमूलो मूलतो बालदोर्भ्याम्॥ ३ ॥

तदनु गिरिवरस्य प्रोद्धृतस्यास्य तावत्
    सिकतिलमृदुदेशे दूरतो वारितापे।
परिकरपरिमिश्रान् धेनुगोपानधस्ता-
    दुपनिदधदधत्था हस्तपद्मेन शैलम्॥ ४ ॥

भवति विधृतशैले बालिकाभिर्वयस्यै-
    रपि विहितविलासं केळिलापादिलोले।
सविधमिळितधेनूरेकहस्तेन कण्डू-
    यति सति पशुपालास्तोषमैषन्त सर्वे॥ ५ ॥

अतिमहान् गिरिरेष तु वामके करसरोरुहि तं धरते चिरम्।
किमिदमद्भुतमद्रिबलं न्विति त्वदवलोकिभिराकथि गोपकैः॥ ६ ॥

अहह धार्ष्ट्यममुष्य वटोर्गिरिं व्यथितबाहुरसाववरोपयेत्।
इति हरिस्त्वयि बद्धविगर्हणो दिवससप्तकमुग्रमवर्षयत्॥ ७ ॥

अचलति त्वयि देव पदात् पदं गलितसर्वजले च घनोत्करे।
अपहृते मरुता मरुतांपतिस्त्वदभिशङ्कितधीः समुपाद्रवत्॥ ८ ॥

शममुपेयुषि वर्षभरे तदा पशुपधेनुकुले च विनिर्गते।
भुवि विभो समुपाहितभूधरः प्रमुदितैः पशुपैः परिरेभिषे॥ ९ ॥

धरणिमेव पुरा धृतवानसि क्षितिधरोद्धरणे तव कः श्रमः।
इति नुतस्त्रिदशैः कमलापते गुरुपुरालय पालय मां गदात्॥ १० ॥

**********